तत्स्नाप् ।) ज्यैष्ठशुक्लदशमी । यथा, ब्रह्म-
पुराणब्रह्मवैवर्त्तयोः ।
“ज्यैष्ठस्य शुक्लदशमी संवत्सरमुखी स्मृता ।
तस्यां स्नानं प्रकुर्व्वीत दानञ्चैव विशेषतः ॥
यां काञ्चित् सरितं प्राप्य दद्याद्दर्भैस्तिलोदकम् ।
मुच्यते दशभिः पापैः सुमहापातकोपमैः ॥
अत्र केवलदशम्यां नदीमात्रे दर्भकरणकतिल-
तर्पणाङ्गकस्नानाद्दशविधपापक्षयः फलम् ।
एवं दानादावपि । वस्तुतस्तु वक्ष्यमाणभविष्ये
जाह्नवीपदश्रवणात् हेतुमन्निगदस्वरसाच्च ब्रह्म-
वैवर्त्तेऽपि सरित्पदं जाह्नवीपरम् । अन्यथा
नानाविधिः स्यात् । यां काञ्चिदिति तु जाह्नवी-
स्तावकम् । अन्यथा कुल्यास्नानेऽपि दशविध-
पापक्षयः स्यात् । मन्त्रलिङ्गे जाह्नवीतिपदश्रव-
णाच्च । गङ्गामधिकृत्य ब्राह्मे ।
‘शुक्लपक्षस्य दशमी ज्यैष्ठे मासि द्विजोत्तम ! ।
हरते दश पापानि तस्माद्दशहरा स्मृता ॥’
अत्र केवलदशम्यां दशविधपापक्षयः फलम् ।
भविष्ये ।
‘ज्यैष्ठशुक्लदशम्यान्तु हस्तयोगेन जाह्नवी ।
हरते दश पापानि तस्माद्दशहरोच्यते ॥’
दशपापानीति दशजन्मकृतानीति । विशेषणीय-
माह पराशरभाष्ये यमः ।
‘ज्यैष्ठे मासि सिते पक्षे दशम्यां हस्तयोगतः ।
दशजन्मावहा गङ्गा दशपापहरा स्मृता ॥’
अत्र दशजन्मकृतदशविधपापक्षयः फलम् ।
‘प्राप्ते कर्म्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ॥’
इति न्यायेन हस्तानक्षत्रगङ्गारूपगुणद्वयविशिष्ट-
दशमीविधेर्यस्मिन्नहनि तल्लाभस्तत्र स्नानम् ।
उभयदिने तु तल्लाभे परदिन एव । अत्रापि
पूर्व्वदिने वक्ष्यमाणकुजवारलाभे तत्रापि स्नानं
वारस्योभयत्रालाभात् । ततश्च पूर्व्वदिने तथा-
विधस्नानं कृत्वा परदिने केवलदशम्यामपि दश-
विधपापक्षयकामेन स्नातव्यम् । शङ्खः ।
‘ज्यैष्ठे मासि क्षितिसुतदिने शुक्लपक्षे दशम्यां
हस्ते शैलान्निरगमदियं जाह्नवी मर्त्यलोकम् ।
पापान्यस्यां हरति च तिथौ सा दशेत्याहुरार्य्याः
पुण्यं दद्यादपि शतगुणं वाजिमेधायुतस्य ॥’
भौमवारहस्तानक्षत्रयुक्तदशम्यां गङ्गास्नाना-
द्दशविधपापक्षयशतगुणवाजिमेधायुतजन्यपुण्य-
समपुण्यं फलम् । राजमार्त्तण्डे वाल्मीकिः ।
‘अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥
एतानि दश पापानि प्रशमं यान्तु जाह्नवि ! ।
स्नातस्य मम ते देवि ! जले विष्णुपदोद्भवे ! ॥
विष्णुपादार्घसम्भूते गङ्गे ! त्रिपथगामिनि ! ।
धर्म्मद्रवीतिविख्याते पापं मे हर जाह्नवि ! ॥’

अत्र मन्त्रत्वेन प्रणवपूर्व्वकाण्येतानि सामान्य-
स्नानमन्त्रान्ते मज्जनस्यादौ पाठ्यानि । आगन्तु-
कानामन्ते अभिनिवेश इति न्यायात् मन्त्रान्ते
कर्म्मसन्निपात इति न्यायात् मन्त्रान्ते कर्म्मा-
दीनि सन्निपातयेत् इत्यापस्तम्बीयाच्च ॥ * ॥
हिंसापैशुन्यादिमिदमाह कामधेनौ देवलः ।
‘कायक्लेशं मनोदुःखं वधं वा प्राणिनां पुनः ।
यः प्रवर्त्तयति द्वेषात् सा हिंसेति समासतः ॥
यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः ।
भृत्यानाञ्चैव वृत्त्यर्थमगस्त्यो ह्याचरत् पुरा ॥’
यद्यपि परुषवचनमपवादः पैशुन्यमनृतं वृथा-
लापो निष्ठुरवचनमिति वाङ्मयानि षट् । परेषां
देशजातिकुलविद्याशिल्परूपवृत्ताचारपरिच्छद-
शरीरकर्म्मजीविनां प्रत्यक्षदोषवचनं परुषम् ।
‘यत्त्वान्यत् क्रोधसन्तापत्राससंजननं वचः ।
परुषं तच्च विज्ञेयं यच्चान्यच्च तथाविधम् ॥
चक्षुष्मन्तिति लुप्ताक्षं चण्डालं ब्राह्मणेति च ।
प्रशंसानिन्दनं देषात् परुषाश विशिष्यते ॥’*॥
तेषामेव परुषवचनानां परोक्षसुदाहरणमप-
वादः ॥ * ॥
गुरुनृपतिवन्धुम्याहमित्रसकाशे अर्थोपघातार्थं
दोषोपाख्यानं पैशुन्यम् ॥ * ॥
अनृतं द्विविधं असत्यमसंवादश्चेति ॥ * ॥
‘देशराष्ट्रप्रसङ्गाच्च परार्थपरिकल्पनात् ।
नर्म्महासप्रसङ्गाच्च भाषणं व्यर्थभाषणम् ॥ * ॥
गुह्याङ्गामेध्यसंज्ञानां वचनं निष्ठुरं विदुः ।
यदन्यद्वा वचो नीचं स्त्रीपुंसोर्म्मिथुनाश्रयम् ॥*॥
इत्येवं षड्विकल्पस्य दुष्टवाक्यस्य भाषणात् ।
इह वामुत्र वा क्रूरमनर्थं प्रतिपद्यते ॥’
प्रशंसया निन्दनं प्रशंसानिन्दनम् । तथाप्यत्र
चतुर्व्विधषड्विधयोरविरोधः । समच्चलासमच्चल-
भेदानादरेण पारुष्यापवादयोरैक्यात् निष्ठुरस्य
परुषान्तर्भावाच्च । असम्बद्धप्रलापव्यर्थभाषणयोः
पर्य्यायत्वात् नार्थान्तरम् । अभिध्यानमपहर-
णार्थमिति शेषः । वितथे असत्यभूते वस्तुनि
अभिनिवेशः पुनः पुनः सङ्कल्पः ।” इति
तिथ्यादितत्त्वम् ॥ * ॥ अपि च ।
“अथ ज्यैष्ठशुक्लदशमी दशहरा । तदुक्तं
हेमाद्रौ ब्राह्मे ।
“ज्यैष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ।
हरते दश पापानि तस्माद्दशहरा स्मृतेति ॥
वाराहेऽपि ।
‘दशमी शुक्लपक्षे तु ज्यैष्ठे मासि कुजेऽहनि ॥
अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा ॥
हरते दश पापानि तस्माद्दशहरा स्मृतेति ॥*॥
स्कान्दे तु दशयोगा उक्ताः । यथा,—
‘ज्यैष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ।
व्यतीपाते गरानन्दे कन्याचन्द्रे वृषे रवौ ॥
दशयोगे नरः स्नात्वा सर्व्वपापैः प्रमुच्यते ॥’इति ।
अत्र बुधभौमयोः कल्पभेदेन व्यवस्था । इयञ्च
यत्रैव योगबाहुल्यं सैव ग्राह्या । योगाधिक्ये
फलाधिक्यात् ॥ * ॥

ज्यैष्ठे मलमासे सति तत्रैव दशहरा कार्य्या न
तु शुद्धे ।
‘दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।’
इति हेमाद्रौ ऋष्यशृङ्गोक्तेः ॥ * ॥
तथा स्कान्दे ।
‘यां काञ्चित् सरितं प्राप्य दद्यादर्घ्यं तिलोदकम् ।
मुच्यते दशभिः पापैः स महापातकोपमैः ॥’
अत्र विशेषः काशीखण्डे ।
‘ज्यैष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम् ।
दशाश्वमेधिके स्नात्वा मुच्यते सर्व्वपातकैः ॥
एवं सर्व्वासु तिथिषु क्रमस्नायी नरोत्तमः ।
आशुक्लपक्षदशमीं प्रतिजन्माघसुत्सृजेत् ॥’
तथा ।
‘लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ ।
दशजन्मार्ज्जितैः पापैस्त्यज्यते नात्र संशयः ॥’
तथा भविष्योत्तरकाशीखण्डयोः ।
‘निशायां जागरं कृत्वा समुपोष्य च भक्तितः ।
पुष्पैर्गन्धैश्च नैवेद्यैः फलैश्च दशसङ्ख्यया ॥
तथा दीपैश्च ताम्बूलैः पूजयेत् श्रद्धयान्वितः ।
स्नात्वा भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः ॥
दशप्रसृतिकृष्णांश्च तिलान् सर्पिषि वै जले ।
सक्तुपिण्डान् गुड़पिण्डान् दद्याच्च दशसङ्ख्यया ॥
ततो गङ्गातटे रम्ये हेम्ना रूप्येण वा तथा ।
गङ्गायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीम् ॥
संस्थाप्य पूजयेद्देवीं तदलाभे मृदापि वा ।
अथ तत्राप्यशक्तश्चेत् लिखेत् पिष्टेन वै भुवि ॥
वक्ष्यमाणेन मन्त्रेण कुर्य्यात् पूजां विशेषतः ।
नारायणं महेशञ्च ब्रह्माणं भास्करं तथा ॥
भगीरथञ्च नृपतिं हिमवन्तं नगेश्वरम् ।
गन्धपुष्पादिभिः सम्यक् यथाशक्ति प्रपूजयेत् ॥
दशप्रस्थान् तिलान् दद्यात् दशविप्रेभ्य एव च ।
दशप्रस्थान् यवान् दद्यात् दशसङ्ख्यागवीस्तथा ॥’
प्रस्थाः षोड़शपलानि । पलन्तु मुष्टिमात्रं परं
स्मृतमिति महार्णवे उक्तम् ।
‘मत्स्यकच्छपमण्डूकमकरादिजलेचरान् ।
कारयित्वा यथाशक्ति स्वर्णेन रजतेन वा ॥
तदलाभे पिष्टमयानभ्यर्च्य कुसुमादिभिः ।
गङ्गायां प्रक्षिपेदाज्यदीपांश्चैव प्रवाहयेत् ॥
पुष्पाद्यैः पूजयेद्द गङ्गां मन्त्रेणानेन भक्तितः ।
ॐ नमः शिवायै नारायण्यै
दशहरायै गङ्गायै नमो नमः ।
इति मन्त्रन्तु यो मर्त्यो दिने तस्मिन् दिवानिशम् ।
जपेत् पञ्चसहस्राणि दशधर्म्मफलं लभेत् ॥’*॥
काशीखण्डे त्वन्यो मन्त्र उक्तः ।
‘नमः शिवायै प्रथमं नारायण्यै पदं ततः ।
दशहरायै पदमिति गङ्गायै मन्त्र एष वै ॥
स्वाहान्तः प्रणवादिश्च भवेद्विंशाक्षरो मनुः ।
पूजा दानं जपो होमस्त्वनेनैव मनुना स्मृतः ॥’इति
अत्र गङ्गास्तोत्रपाठमपि दशवारं कुर्य्यात् ।
तदुक्तं भविष्ये ।
‘तस्यां दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः ।
यः पठेत् दशकृत्वस्तु दरिद्रो वापि वाक्षमः ॥